करभकाण्ड + कम् + अत इत्वम् ।) उष्ट्रकाण्डीवृक्षः । इति राजनिर्घण्टः ॥

करभप्रिया, स्त्री, (करभस्य करिशावकस्य उष्ट्रस्य वा प्रिया ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभवल्लभः, पुं, (करभस्य हस्तिशावस्य वल्लभः प्रियः ।) कपित्थवृक्षः । पीलुवृक्षः । इति राजनिर्घण्टः ॥

करभादनी, स्त्री, (करभेन उष्ट्रेन अद्यतेऽसौ । अद + कर्म्मणि ल्युट् । ततो + ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभी, [न्] पुं, (कर इव भाति करभः शुण्डः स अस्यास्ति । करभ + इनिः । यद्वा करभः हस्तावयवविशेषः सोऽस्य शुण्डावच्छेदे अस्तीति इनिः ।) हस्ती । इति राजनिर्घण्टः ॥

करभी, स्त्री, (करभ + ङीष् ।) उष्ट्री । तत्पर्य्यायः । वामी २ । इति जटाधरः ॥

करभीरः, पुं, (करभिणं हस्तिनं ईरयति प्रेरयति मृत्युमुखम् । करभि + ईर् + अण् ।) सिंहः । इति शब्दरत्नावली ॥

करभूषणं, क्ली, (करयोर्भूषणम् ।) कङ्कणम् । इत्यमरः । २ । ६ । १०८ ॥ हस्ताभरणमात्रञ्च ॥

करमट्टः, पुं, (करं करिशुण्डमपि अट्टति तुच्छीकरोति । अस्य सरलकाण्डत्वात् तथात्वम् । अट्ट अनादरे + खसुम् प्रत्ययः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (गुवाकशब्देऽस्य गुणा ज्ञातव्याः ॥)

करमरी, [न्] पुं, (किरति क्षिपति अत्र दण्ड्यान् इति करः कारागारः । कॄ + अधिकरणे अप् । तस्मिन् करे मरः मरणं मृत्युवत् यातना यस्य बाहुलकात् इनिः । तत्र म्रियते वा ।) वन्दी । इति त्रिकाण्डशेषः । कयेदी इति भाषा ॥

करमर्द्दः, पुं, (करं मृद्गातीति । कारकशूमदत्वात् । मृद्क्षोदे + कर्म्मण्यण् । करेण मृद्यते इति कर्म्मणि अप् वा ।) करमर्द्दकवृक्षः । इति शब्दरत्नावली ॥ (यथा भावप्रकाशे,—अस्य गुणा उक्ताः ।

"लघुदीर्घफलाभ्यान्तु करमर्द्दद्वयं मतम् ।
करमर्द्दद्वयं त्वाममम्लं गुर्व्वत्युष्णाहरम् ॥ /
उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघुपित्तसमीरजित् ॥
करमर्द्दः सुषेणः स्यात् कृष्णपाकफलस्तथा ।
तस्माल्लघुफलायास्तु सा ज्ञेया करमर्द्दिका ॥)

करमर्द्दकः, पुं, (कर + मृद + ण्वुल् । करमर्द्द एव स्वार्थे कन् इति वा ।) वृक्षविशेषः । इत्यमरटीकासारसुन्दरी । पाणि आमला इति भाषा ॥ इति रत्नमालाराजनिर्घण्टादयः । करौन्दा इति करम्चा इति च भाषा । तत्पर्य्यायः । कृष्णपाकफलः २ अविग्नः ३ सुषेणः ४ । इत्यमरः । २ । ४ । ६७ ॥ कृष्णपाकः ५ पाकफलः ६ कृष्णफलः ७ पाककृष्णफलः ८ कृष्णफलपाकः ९ पाककृष्णः १० फलकृष्णः ११ पाकफलकृष्णः १२ वनालयः १३ वनालकः १४ कराम्लकः १५ वोलः १६ वषः १७ आविग्नः १८ । इति तट्टीकायां भरतः ॥ करमर्दी १९ तनेक्षुद्रा २० कराम्लः २१ । इति रत्नमाला ॥ करमर्द्दः २२ पाणिमर्द्दः २३ । तद्वालफलगुणाः । तिक्तत्वम् । अम्लत्वम् । दीपनत्वम् । दाहदाहत्वञ्च । तत्पक्वफलगुणाः । त्रिदोषशमनत्वम् । अरुचिविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पिपासानाशित्वम् । अम्लत्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (यथा, वाभटः ।

"गुरूष्णवीर्य्यं वातघ्नं सरञ्च करमर्द्दकम्" ॥)

करमर्द्दी, स्त्री, (करं मृद्गातीति । कर + मृद + अण् ङीप् ।) करमर्द्दकवृक्षः । इति रत्नमाला ॥

करमालः, पुं, (करः करिशुण्डः तदाकारा माला समूहः यस्य मेघस्य धूमस्य वा क्रमशः करिशुण्डवत् प्रसरत्वात् तथात्वम् ।) खतमालः । धूमः । इति हेमचन्द्रः ॥

करमाला, स्त्री, (कराङ्गुलीभिर्मालयेव जपनात् कररूपा माला । कराङ्गुल्य मालेव वा ।) करपर्व्वरूपमाला । यथा,

"अनामिकात्रयं पर्व्व कनिष्ठात्रितयं तथा ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" ॥

इति मुण्डमालातन्त्रे सामान्यविषयम् ॥ * ॥

"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्" ॥

इति शिवरहस्यीयं शक्तिभिन्नविषयम् ॥ * ॥

"अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्" ॥

इति सनत्कुमारसंहितावचनं शक्तीतरेषामष्टवारविषयम् ॥ * ॥

"अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्विका ॥
करमाला समाख्याता आरभ्यानामिकान्तरात् ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्" ॥

इति शक्तिविषये मुण्डमालातन्त्रम् ॥ * ॥ तथा ।

"अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" ॥

इदमपि शक्तिविषये अष्टवारपरम् । इति श्यामारहस्यम् ॥

करमुक्तं, क्ली, (करेण सुदृढं धृत्वा शत्रुं प्रति मुच्यते । कर + मुच् + कर्म्मणि क्तः ।) अस्त्रविशेषः । इति हलायुधः । बरछी भाला इत्यादि भाषा ॥

करम्बः, पुं, (कम् करणे + "कृकदि कडीत्यम्बच्" । उणां । ४ । ८२ ।) करम्भः । इत्यमरटीकायां नीलकण्ठः ॥ मिश्रिते त्रि । इति हेमचन्द्रः ॥

करम्बितः, त्रि, (करम्बः मिश्रणं जातोऽस्य । करम्ब + इतच् ।) मिश्रितः । खचितः । इति त्रिकाण्डशेषः ॥ ("ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥ इति गीतगोविन्दः । १ । २ ॥)

करम्भः, पुं, (केन जलेन रभ्यते मिश्रीक्रियते । रभिधातोरनेकार्थत्वात् "अकर्त्तरि चेति" घञ् ।३।३। १९। रभेरशब्लिटोः । ७ । १ । ६३ । इति नुम् ।) दधिमिश्रितशक्तुः । इत्यमरः । २ । ९ । ४८ ॥ (यथा शतपथब्राह्मणे । २ । ५ । २ । ४ । "अतुषानिव यवान् कृत्वा तानीषदीवोपतप्य तेषां करम्भपात्राणि कुर्व्वन्ति" ॥ उदमन्थः । यथा, यजुर्व्वेदे १९ । २१ ।

"धानाः करम्भः सक्तवः परिवापः पयोदधि" ।

"करम्भः उदमन्थः । इति वेददीधितिः ॥ भक्ष्ययवमात्रम् । यथा मनुः १२ । ७६ ।

"करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" ।

करम्भवालुकातापान् करम्भैर्यवैः सह भक्ष्या या वालुकाः तद्वत्तप्तवालुकादीन् इत्यर्थः ॥ मिश्रगन्धः । यथा भागवते ३ । २६ । ४५ ।

"करम्भपूतिसौरभ्य शान्तोदग्रादिभिः पृथक् ।
द्रव्यावयववैषम्याद्गन्ध एको विभिद्यते" ॥)

करम्भकं, क्ली, (करम्भ एव स्वार्थे कन् ।) करम्भः । दधिसक्तवः । तत्पर्य्यायः । कर्कसारम् २ । इति हारावली ॥

करम्भा, स्त्री, (केन जलेन रभ्यते सिच्यते इति । अथवा केन वायुना रभ्यते मिश्रीक्रियते नानागन्धो यस्याः । रभेर्नानार्थत्वात् क + रभ + घञ् + नुम् टाप् च ।) शतावरी । प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥ (स्वनामख्याता कलिङ्गदेशोत्पन्ना रमणी । सा तु पूरुवंशीयस्याक्रोधनस्य पत्नी । यथा महाभारते १ । ९५ । २२ ।

"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः" ॥)

कररुहः, पुं, (करे रोहति कराङ्गुलीभ्य उत्पद्यते इत्यर्थः । कर + रुह + "इगुपधेति" । ३ । १ । १३४ । कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा आर्य्यासप्तशती ३७ । "यस्याः कररुहखण्डितकाण्ड-पटप्रकटनिर्गता दृष्टिः" ॥)

करर्द्धिः, स्त्री, (करस्य ऋद्धिः करेण ऋद्धिर्यस्य वा । करसम्पत् ।) करताली । इति त्रिकाण्डशेषः ॥

करवालिका, स्त्री, (करं वलते । वल हिंसादानयोः अण् । करेण वाल्यते वा । णिजन्तादच इः ततः कन् + टाप् च ।) करपालिका । इत्यमरटीकायां भरतः ॥

करवी, स्त्री, (कस्य वायोः रवो यत्र । गौरादित्वात् ङीष् ।) कवरी । हिङ्गुपत्रम् । इति शब्दचन्द्रिका ॥

करवीरः, पुं, (करं वीरयति । वीर + विक्रान्तौ + कर्म्मण्यण् ।) खड्गः । दैत्यविशेषः । इति मेदिनी ॥ श्मशानम् । इति हेमचन्द्रः ॥ ब्रह्मावर्त्ते दृषद्वतीनदीतीरे चन्द्रशेखरराजपुरम् । इति कालिकापुराणे ४९ अध्यायः ॥ (पर्व्वतविशेषः । यथा, भागवते ५।१९।२८ ।

"एवमपरेण पवनपारियात्रौ
दक्षिणेन कैलास करवीरौ प्रगायतौ" ॥

नागविशेषः । यथा, महाभारते १ । ३५ । १२ ।

"करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डुरः" ॥)

वृक्षविशेषः । करवी इति भाषा ॥ (यथा रामायणे ३ । १७ । १० ।

"दाडिमान् करवीरांश्च अशोकांस्तिलकांस्तथा" ॥)

तत्पर्य्यायः । प्रतिहासः २ शतप्रासः ३ चण्डातः ४ हयमारकः ५ । इत्यमरः । २।४।७६ ॥ प्रतीहासः